# अलङ्कारशास्त्रानुसारं काव्यात्मान्वेषणम्

**उत्तमप्रसादः खतिवडाः**

*सहप्राध्यापकः, नेपालसंस्कृतविश्वविद्यालयः, विश्वविद्यालयविद्यापीठम्*

up.sharma977@gmail.com

Orcid : https://orcid.org/0009-0003-1740-9507

https://doi.org/10.3126/anveshana.v4i1.96895

**शोधसारः**

*अनुसन्धानमिदं काव्यात्मान्वेषणविषयकं विचारमाधृत्य प्रस्तुतं विद्यते। आधुनिकीं पद्धतिं स्वीकृत्य सविश्लेषणमात्मनः स्वरूपं प्रदर्श्यात्र काव्यात्मविषये निष्कर्षोऽपि स्थापितोऽस्ति। दर्शनसम्मतमात्मस्वरूपं प्रतिपाद्य काव्यसम्मतात्मस्वरूप–निरूपणमेवास्यानुसन्धानस्य प्रमुखमुद्देश्यं विद्यते। शरीरे यथात्मनो महत्त्वं विद्यते तथैव काव्येऽपि आत्मा महत्त्वपूर्णोऽस्ति। परन्तु काव्यस्यात्मा कः ? इति महत्त्वपूर्णा जिज्ञासा आलङ्कारिकाणां मनसि समुपस्थिता। वस्तुतो यस्याभावे काव्यं मृततुल्यमग्राह्यमुपेक्षणीयञ्च जायते , तत्तत्त्वमेवात्मतत्त्वम्। शरीरेऽपि आत्मनोऽभावे विक्रिया दृश्यते। समग्रं शरीरमेवास्पृश्यमनुपयुक्तञ्च निष्पद्यते। काव्यात्मविषये सर्वेऽप्यालङ्कारिका अन्वेषणपराः सन्ति। मूलतः काव्यात्मान्वेषण एव साहित्यशास्त्रे षट् सम्प्रदाया विकसिता अभूवन्। तेषां सर्वेषां सम्प्रदायानां काव्यात्मविषये भिन्ना भिन्ना धारणा वरिवर्ति। तेष्वाद्यः सम्प्रदायो विद्यते रससम्प्रदायः। सम्प्रदायोऽयं रस एव काव्यस्यात्मा इति समुद्घोषयति। तदनन्तरमलङ्कारसम्प्रदायो विकसितोऽभूत्काव्यात्मचिन्तनपरम्परायाम्। एतन्मतानुसारमलङ्कार एव काव्यस्य सर्वोत्कृष्टं तत्त्वमिति। ततो ध्वनिसम्प्रदायस्योदयो जातः। आनन्दवर्धनाचार्यप्रतिपादितो ध्वनिसिद्धान्तोऽपि काव्यस्यात्मा ध्वनिरिति ध्वनेः काव्यात्मत्वं वर्णयति। रीतिरात्मा काव्यस्य इत्युक्त्वा रीतिसम्प्रदायो रीतिरेव काव्यस्यात्मा इति विवेचयति। तथैव वक्रोक्तिसम्प्रदायः "वक्रोक्तिः काव्यजीवितम्" इति प्रतिपादयन् वक्रोक्तेः काव्यस्यात्मरूपत्वं संस्थापयति। एवमेव कनिष्ठसम्प्रदायो विद्यत औचित्यसम्प्रदायः। अयमपि सम्प्रदाय औचित्यस्य सर्वातिशायित्वं व्याख्याय काव्यात्मान्वेषणसरणौ नवीनं चिन्तनं प्रकटयति। पूर्वीयसाहित्यसिद्धान्तानुसारं काव्यात्मान्वेषण एव सर्वेषामलङ्कारग्रन्थानां पर्यवसानं दरीदृश्यत इत्यादयो विषया अध्ययनेऽस्मिन् विवेचिताः सन्तीति।*

**प्रमुखाः शब्दाः** आत्मा, कटकः, काव्यम्, क्षेत्रज्ञः, साहित्यशास्त्रम्।

**विषयपरिचयः**

साहित्यशास्त्रमेवालङ्कारशास्त्रं सौन्दर्यशास्त्रं व्यवहारशास्त्रमित्यादिनामधेयैर्लोके परिचीयते। शास्त्रमिदं लोकव्यवहारेऽतीवोपयोगि वरीवर्ति। मूलतः शास्त्रमिदं द्विधा विभक्तं प्राप्यते। तत्र काव्यलक्षणगुणदोषादीना. प्रतिपादकं

लाक्षणिकं शास्त्रम् , काव्यमहाकाव्यादिबोधकं च साहित्यिकशास्त्रम्। तत्रापि लाक्षणिको भागो विचारात्मको भवति चेत् साहित्यिको भागो भावात्मको जायते। सामान्यतया काव्यात्मान्वेषणं साहित्यशास्त्रं करोति तथापि केवलमात्मान्वेषणं नास्य विषयः। आत्मान्वेषणम्, आत्मचिन्तनादिकं तु दर्शनशास्त्रमेव विधत्ते। आत्मशब्द एव न साहित्यशास्त्रस्य शब्दोऽयमुपनिषद्दर्शनादिशास्त्रेभ्यः स्वीकृतोऽस्ति। तेषु तेषु दर्शनेषु आत्मनश्चर्चा श्रूयते। "एषोऽणुरात्मा चेतसा वेदितव्यः", "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (बृहदारण्यकोपनिषद्, २०३६, पृ. २०५) इत्यादिरीत्या उपनिषदि आत्मजिज्ञासा प्रकटिता। "अथातो ब्रह्मजिज्ञासा " (शङ्कराचार्यः, २०३५, पृ. १९), "आत्मानं चेद्विजानीयाद् अयमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत्" (विद्यारण्यः, २०५२, पृ. १०५), "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" (शुक्लयजुर्वेदः, २०७६, पृ. १४८), "महान्तं विभुमात्मानं मत्वाधीरो न शोचति" इति आत्मज्ञानस्य फलमपि प्रदर्शितमस्ति। दर्शनानि हि आस्तिक-नास्तिकभेदेन द्विविधानि ख्यातानि। तत्र न्याय-वैशेषिक-सांख्य-योग-वेदान्त-मीमांसाख्यानि आस्तिकदर्शनानि। अनया रीत्या द्वादशदर्शनापि पूर्वीयदर्शनानि सनति। सर्वैर्दर्शनैरात्मविषयको मोक्षविषयकश्च विचारः प्रकटितो विद्यते। कैश्चित् "चैतन्यमात्मा" (शिवसूत्र-१/१) इति आत्मनः स्वरूपं प्रतिपादितमस्ति, तथैव न्यायदर्शनेन च "ज्ञानाधिकरणमात्मा" (धितालः, २०७८, पृ. ५०) इति, इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् (गौतमः, सन् १९६०, पृ. ७०) इत्यनया रीत्या आत्मा परिभाषितः। अयमेव आत्मा क्षत्रज्ञ-शब्देन भगवद्गीतायां प्रतिपादितः-"इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते। एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः" (वेदव्यासः, २०७५, पृ. ६५) इति। अत्र क्षेत्रशब्देन शरीरं, क्षेत्रज्ञशब्देन च जडशरीरस्य ज्ञाता चैतन्यरूप आत्मा अङ्गीकृतः। संक्षेपेणोच्यमाने शरीरस्य सारभूतं वस्तु आत्मैव विद्यते यस्याभावे शरीरं मृतवत् प्रतीयते। अत आत्मनो महत्त्वं कल्पनातीतं विद्यते। अनया रीत्या आत्मशब्दस्य प्रयोगः प्रथमं दर्शनशास्त्र एव जातम्। काव्यशास्त्रे सर्वप्रथममात्मशब्दस्य प्रयोग अष्टमशताब्द्यां "रीतिरात्मा काव्यस्य" इत्युक्त्वा वामनैव विहितम् (चौधरीः, सन् १९६२, पृ. १६२)। ततश्चानेनैव प्रकारेण एकादशशताब्द्यामानन्दवर्धनेन "काव्यस्यात्मा ध्वनिः" (आनन्दवर्धनः, सन् २०१०, पृ. १) इत्युक्त्वा काव्यस्यात्मत्वेन ध्वनिः प्रदर्शितः। चतुर्दशशताब्द्यां विश्वनाथेनापि काव्यसम्बन्धिनी स्वकीया धारणाभिव्यक्ता प्राप्यते। तत्र तेन च काव्यात्मत्वेन रसोऽङ्गीकृतः। "काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलङ्काराः कटककुण्डलादिवत्" (विश्वनाथः, २०६७, पृ. १५) इति। वस्तुतो देहात्मा, काव्यात्मा वा किं न स्यान्महत्त्वपूर्णः पक्ष एव आत्मपदेन व्यपदिश्यते। दार्शनिकैश्च कैश्चिच्चैतन्यस्य आत्मत्वम्, कैश्चित् प्राणानामात्मत्वम्, "बृहत्त्वाद् बृंहणत्त्वाद्वा आत्मैव ब्रह्मेति गीयते" (ब्रह्मसूत्र भामती टीका) इत्युक्त्वा व्यापकश्च पोषकस्य चात्मत्वमङ्गीकृतमस्ति। आद्यजगद्गुरुणा आचार्यशङ्करेण च कठोपनिषद्भाष्ये आत्मशब्दस्य व्युत्पत्तिश्चतुर्धा प्रस्तुता प्राप्यते। चतुर्भ्यो धातुभ्य आत्मशब्दनिष्पत्तिर्भूत्वा व्युत्पत्तिर्मननीया अस्ति। तत्कथनानुसारम्-"यच्चाप्नोति यदादत्ते, यच्चात्ति विषयानिह। यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते" (कठोपनिषद्, २०३६, पृ. ४२) इति। आप्-धातोराङुपसर्गपूर्वकाद् दाधातोः, अद्धातोः, अस्धातोश्च आत्मशब्दो निष्पद्यते। धातूनामेतेषामर्थचिन्तनं क्रियते चेत्- व्यापनशीलः,

ग्रहणसमर्थः, भोगवान्, सर्वदा समानतया विद्यमानश्चेति चत्वारोऽर्था आत्मशब्दाद् निष्पद्यन्ते। देहात्मपदेन एते अर्थाः संभाष्यन्ते चेत् काव्यात्मपदेनापि काव्यस्य, काव्यस्य जीवनरूपो धर्मो ज्ञायते। एकेनालङ्कारिकेण कुन्तकेन तु आत्मशब्दस्य पर्यायरूपेण जीवनशब्दस्य प्रयोगो विहित एव। "वक्रोक्तिः काव्यजीवितम्" इत्युक्त्वा काव्यात्मत्वेन वक्रोक्तिः स्वीकृता। काव्यात्मान्ते पणपरैर्बहुभिराचार्यैर्बहवः संप्रदायाः प्रतिपादिताः। काव्यात्मा चान्विष्टः। तेषामन्वेषणसरणिः कीदृशी आसीदिति अध्ययनेऽस्मिन् विचार्यते।

## अध्ययनस्य प्रमुखाः समस्याः

आत्मनिरूपणं बहुभिर्विद्वद्भिर्विहितमस्ति। दार्शनिकशास्त्रैः साहित्यशास्त्रैश्च पृथक्पृथग्रूपेणात्मस्वरूपं निर्दिष्टं विद्यते। देहात्मकाव्यात्मविषये विचारिते सत्यध्ययनेऽस्मिन्निम्नाङ्कितं समस्याद्वयं दृग्गोचरीभवति। यथा–

क) आत्मस्वरूपं कीदृशम् ?

ख) काव्यात्मान्वेषणसरणिः का ? इति।

## अध्ययनस्योद्देश्यम्

पौरस्त्यवाङ्मये दर्शनस्य साहित्यस्य च महत्त्वपूर्णं स्थानं वरीवर्ति। मूलत आत्मतत्त्वान्वेषणे न्यायवैशेषिकादिदर्शनानि संलग्नानि सन्ति चेत् काव्यात्मान्वेषण आलङ्कारिका आचार्या दत्तावधाना दृश्यन्ते। आपाततो विचारिते निम्नाङ्कितमुद्देश्यं दरीदृश्यते। यथा –

क) आत्मस्वरूपनिरुपणम्।

ख) काव्यात्मान्वेषणम्। इति।

## अध्ययनविधिः

अनुसन्धानस्यास्य निष्पादनायावश्यकसामग्रीसङ्कलनाय च विशेषरूपेण पुस्तकालयीयाध्ययनविधिरेवात्राङ्गीकृतोऽस्ति। आत्मतत्त्वप्रतिपादका दार्शनिकग्रन्थाः काव्यतत्त्वप्रतिपादकाः संस्कृतमूलग्रन्थास्तथा तत्सम्बद्धाः भाषाग्रन्थाः एवं आत्मप्रतिपादनपरिधिङ्गता विदुषामालेखाश्च अध्ययनस्यास्य प्रमुखसामग्रीत्वेनोरीकृताः सन्ति। आत्मतत्त्वबोधनक्रमे तुलनाप्रतितुलनादिविधिं स्वीकृत्य सञ्चितसामग्रीणामध्ययने यथायथं चिन्तनमनननिदिध्यासनादिविधयश्चाङ्गीकृताः। एवमेव लेखनिष्पादनसन्दर्भे प्रस्तुतसामग्रीणां सत्यापनाय लेखकमितिपृष्ट(APA)पद्धतिं स्वीकृत्य सन्दर्भाङ्कनं विधीयते।

## अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

पौरस्त्यवाङ्मयसम्बद्धो दार्शनिकः साहित्यिकश्च सिद्धान्तोऽध्ययनस्य क्षेत्रमस्ति। आत्मविषये दार्शनिकैः साहित्यिकैश्च कीदृशानि स्वाभिमतानि प्रकटितानि, निष्कर्षश्च कः स्थापित इत्यादिविषया अत्र समुपस्थाप्यन्ते। अत आत्मतत्त्वसम्बद्धाः सर्वे विषया आलेखस्यास्य क्षेत्रं तथा तदतिरिक्तविषयाश्च अध्ययनस्य सीमारूपाः सन्ति।

## आत्मस्वरूपम्

"आत्मनस्तु कामाय सर्वं प्रियं भवति" (बृहदारण्यकोपनिषद्, २०३६, पृ. ११५) इत्यौपनिषदीं मुक्तिं विचार्य एतन्निश्चित्य वक्तुं शक्यते यत् संसारस्य सर्वेषु वस्तुषु आत्मा अतिशयप्रियो वर्तते, आत्मनः कृते एव अन्ये पदार्थाः प्रिया भवन्ति। अतः शरीरे चैतन्यरूपेण विराजमान आत्मा सर्वेषां प्राणिनां प्रेमास्पदो वरीवर्ति। अत एव आत्मचिन्तनपरेण विद्यारण्येनोक्तम्-"इयमात्मा परानन्दः परप्रेमास्पदं यतः। मा न भुवं हि भूयासमिति प्रेमात्मनीक्षते॥" (विद्यारण्य, २०५२, पृ. ४० ) इति। आत्मनः स्वरूपविषये दार्शनिकानां भिन्ना भिन्ना धारणा विद्यते। अद्वैतवादे ब्रह्मण अनाद्यनन्तत्वेन तस्य रहस्यमयस्वरूपस्य जिज्ञासा स्वाभाविकी वर्तते। ब्रह्मतत्त्वस्य चिन्तनमननयोः प्रवृत्तिः उपनिषदि तथा शङ्कराचार्यपूर्ववेदान्तग्रन्थेषु समुपलभ्यते। परन्तु सम्यक्तया पल्लवितं चिन्तनन्तु शङ्कराचार्यद्वारैव। वेदवेदान्तोपनिषद्भिः सततं ब्रह्मसाक्षात्कारायैव दिव्यदृष्ट्या महर्षिभिरौपनिषदविचारस्य पल्लवनं स्वस्य रहस्यात्मकानुभूतेश्च दर्शनं यस्मिन् दर्शने कृतं तद्दर्शनं वेदान्तदर्शनं वर्तते। तस्मिन् दर्शने येषां तत्त्वानां वर्णनं कृतं तत्र सर्वमूर्धन्यं ब्रह्म एव वर्तते। वेदान्तीयचिन्तनपरम्परायाः परमं लक्ष्यं ब्रह्मज्ञानमेव। ज्ञानेन विना कदापि मुक्तिर्भवितुं न शक्नोति, ज्ञानं च ब्रह्मविषयकमेव। ब्रह्मणि एव दृश्यमानं जगत् अध्यस्तं वर्तते। ब्रह्म एव सर्वेषां केन्द्रबिन्दुर्वर्तते। अत एव वेदान्तविद्यायै ब्रह्मविद्याशब्दस्यापि प्रयोगो भवति। अतो वेदान्तादिग्रन्थसम्मतब्रह्मस्वरूपं विविच्यते।

शब्दकल्पद्रुमानुसारं च – बृंहति वर्द्धते निरतिशयमहत्त्वलक्षणवृद्धिमान् भवतीत्यर्थः इति ब्रह्मलक्षणं कृतम् । अर्थाद् यस्य परिणामः निरतिशयः सर्वव्यापको विभुर्वर्तते इत्यर्थे बृहिधातोः, *बृंहेर्नोऽच्च* (उणादि) इत्युणादिसूत्रेण बृंहेर्मनिन्प्रत्यये बृंह्-धातोर्ऋकारस्य रत्वेन नकारस्य चाकारविधानेन ब्रह्मशब्दस्य निष्पत्तिर्भवति। ब्रह्मशब्दस्यार्थो बृहत् वा वर्धनमस्ति । देशकालाद्यनवच्छिन्नमानन्दस्वरूपं बृहदाकारकं ब्रह्म इत्यपि वक्तुं शक्यते। यस्यापेक्षया बृहत्तरं तत्त्वं नास्ति तद् विभु इति। विभुत्वमेव ब्रह्मपदवाच्यार्थस्याभासं कारयति परन्तु व्युत्पत्तिमात्रं न पर्याप्तम्। विभुत्वयोग्यन्तु न केवलं ब्रह्ममात्रमपितु आकाशकालदिगात्मानश्च सन्ति। ब्रह्मशब्दस्य व्युत्पत्तिगतार्थः अन्यव्यापकतत्त्वेभ्यः ब्रह्मणः भेदं न कारयति। अतः सर्वेषां मनसि जिज्ञासा भवति ब्रह्म एतेभ्यस्तत्त्वेभ्यो भिन्नोऽभिन्नस्तादात्म्यापन्नो वा इति ज्ञानाय ब्रह्मणः सार्वं विवेचनमावश्यकम्। वेदोपनिषद्गीतावेदान्तग्रन्थेषु ब्रह्मणो विषये यो यो महत्त्वपूर्णो विषय उद्घाटितस्तस्य चर्चया ब्रह्मणः समग्रं स्वरूपं ज्ञायते।

मुण्डकोपनिषदि एकस्मिन् स्थले *'तिलेषु तैलवत् वेदे वेदान्तः सुप्रतिष्ठितः'* (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. ६५७) इत्यायाति। श्रीमद्भागवते च *'वेदाः ब्रह्मात्मविषयाः'* (वेदव्यास, श्रीमद्भागवतमहापुराणम् (स्थूलाक्षरं मूलमात्रम्), २०७५, पृ. ६०८) इति दर्शनेन वेदो ब्रह्मण आत्मनश्च विषय इत्युक्तम्। ऋग्वेदे च प्रजापति-विश्वकर्म-त्वष्टृदेवानाञ्च विशेषतया वर्णनं प्राप्यते। तत्र षड्लोकस्य धारणकर्ता अजन्मा एकश्च वर्तते इत्युक्तम् । एवञ्च *'एकं सद्विप्राः बहुधा वदन्ति'* (भट्टाचार्य, १९९६, पृ. १२८) इत्यादिवचनमपि ब्रह्मणो विषयेऽस्ति। यजुर्वेदसंहितायामपि *'ईशावास्यमिदं सर्वम्'* (गिरि , २०७६, पृ. ३३४) इति दर्शनेनापि अद्वैतसत्ताया एव बोधो भवति। तथैव

यजुर्वेदसंहिताया एव द्वात्रिंशत्तमेऽध्याये सहस्रशिरस्कस्य पुरुषस्य वर्णनं प्राप्यते। तत्र- *'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्'* (गिरि, २०७६, पृ. २८७) इत्यादिवचनं ब्रह्मणो सर्वव्यापकतां द्योतयति। तत्र विराट् परमात्मा भूमिमभिव्याप्य दशाङ्गुलाधिकः सन् ब्रह्माण्डाद्बहिरप्यवस्थित इत्युक्तम्। यद्यपि यजुर्वेदे बहुशो ब्रह्मशब्दप्रयोगेऽपि सर्वत्र परमात्मने अद्वैततत्त्वाय न प्रयुक्तमपितु ब्रह्म-ब्राह्मण-प्रजापत्याद्यर्थबोधायापि प्रयुक्तं वर्तते।

ब्रह्मणो रहस्यमयत्वात् सर्वव्यापि-अनादि-अनन्तमयत्वात्तथैव चित्स्वरूपत्वेन अज्ञातस्वरूपस्य जिज्ञासा एवं तद्विषयकचिन्तनमपि उपनिषदि प्रचुरं प्राप्यते। अद्वैतवादस्य सैद्धान्तिकस्वरूपस्य विकास शंकराचार्यस्य समये जातेऽपि उपनिषदि तन्मयचिन्तनं प्रचुरं प्राप्यते। छान्दोग्योपनिषदि केनचन मन्त्रेण साधितं जगतः सत्ता ब्रह्मणः पृथङ्नास्ति, सम्पूर्णं जगत् ब्रह्मस्वरूपमेवास्ति। एतादृशो विचार एव बृहदारण्यकोपनिषद्यपि प्राप्यते (शङ्कराचार्य, बृहदारण्यकोपनिषद्भाष्यम्, २०५८, पृ. ५५०-५५५) । तैत्तिरीयोपनिषद्यपि अद्वैतमतसमर्थनाय ब्रह्मणः परिभाषा प्राप्यते। अत्र वरुणः स्वपुत्रं भृगुं सम्बोध्य ब्रह्मस्वरूपं प्रतिपिपादयिषुः- येन सर्वाणि भूतानि जायन्ते, तथैव जीवन्ति, मृते सति यत्र प्रविशन्ति, तद् विजिज्ञासस्व तद् ब्रह्म (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. २८) इत्याख्याति। उपनिषद एतेन लक्षणेन अद्वैतसम्मतं पूर्णं ब्रह्म ज्ञायते। अतो ब्रह्म अधिष्ठानं जगच्चाध्यासो वर्तते। जगद्रूपोऽध्यासो ब्रह्मरूपाधिष्ठानेऽविद्यया उत्पद्यते, अविद्यानिवृत्तावध्यासोऽपि निवर्तते। सच्चिदानन्दस्वरूपं ब्रह्म वर्तते । आदिमध्यान्तरहितं देशकालातीतमविनाशि सूक्ष्मबृहद्स्थूलरहितमावरणहीनं, तमोरहितं, स्वादगन्धहीनमिन्द्रियातीतञ्च तद्ब्रह्म वर्तते, ब्रह्म किमपि न खादति, न च तत्तत्त्वं कोऽपि खादितुं शक्नोति (शङ्कराचार्य, बृहदारण्यकोपनिषद्भाष्यम्, २०५८, पृ. ७६४) इत्याद्यभिप्रायो बृहदारण्यकोपनिषदि याज्ञवल्क्यस्य गार्गीं प्रति समायाति। कुत्रचित् ब्रह्मणः स्रष्टृरूपेणापि वर्णनं प्राप्यते। ब्रह्मसूत्रकारः बादरायणश्च प्रथमे सूत्रे ब्रह्म जगतः सृष्टिस्थितिलयानां कारणमित्युक्तवान् (शङ्कराचार्य, ब्रह्मसूत्रशाङ्करभाष्यम्, सन् २०१३, पृ. ३४) अयमेव विचार उपनिषद्यपि प्राप्यते। तैत्तिरीयोपनिषदि ब्रह्मणः स्रष्टृरूपेण वर्णनं प्राप्यते। (ईशादिविंशोत्तरशतोपनिषद्, सन् १९४८, पृ. २८) याज्ञवल्क्यः बहुस्थाने आत्मा एवं ब्रह्म अज्ञेयं वर्तत इत्युक्तवान्, अतः बृहदारण्यकोपनिषदि एकस्मिन् स्थले याज्ञवल्क्यो वदति- आत्मा नेति नेति शब्देनाग्राह्यो वर्तते। सोऽशीर्योऽसङ्ग एवमाबद्धो वर्तते , यतो हि स न जीर्णो न च कस्मिँश्चिदप्यासक्तो वर्तते। न च कोऽपि तं व्यथयितुं शक्नोति, न च स हतो भवति। उपनिषत्सु ब्रह्मणः सगुणनिर्गुणभेदेन सत्ताद्वयं वर्णितं प्राप्यते। शंकराचार्यश्च परा-अपराविद्याभेदेन सगुणनिर्गुणस्वरूपयोः समन्वयमभिप्रैति। परापराविद्ययोः परस्परं भेद उपनिषत्सूपलभ्यते (गिरिः, २०७३, पृ. २६५-२६६)। उपनिषत्सु वर्णितः परापराविद्याभेदः शंकराचार्यवर्णितभेदतुल्यस्तु न वर्तते तथापि तज्ज्ञाने सहायकसिद्ध एवेति नात्युक्तिः। अत उपनिषत्सु वर्णितं ब्रह्म एक एवास्ति। सृष्टेरुपादानमपि तदेव । संसारस्य सर्वमपि तत्त्वं रज्जौ ग्रन्थिसदृशं वर्तते। यद् प्रकृतेः प्रारभ्य ब्रह्मणि समाप्तं भवति। यथा शरीरान्तर्वर्तिन आत्मनो विषये दार्शनिकानां धारणा भिन्नास्ति, तथैव काव्यात्मविषयेऽपि साहित्यशास्त्रविचारकाणां पृथक् पृथग्विचारोऽनुभूयते। दर्शनपरम्परायां षड् दर्शनानि यथा आस्तिकदर्शनत्वेन प्रसिद्धानि तथैव साहित्यशास्त्रेऽपि षट् सम्प्रदायाः प्रसिद्धाः सन्ति। काव्यात्मान्वेषणक्रमे एव तेषां सम्प्रदायानामुत्पत्तिर्जाता काव्यवाङ्मये आत्मशब्दस्यार्थः

प्राधान्यं प्रामुख्यं वा स्वीक्रियते। अतः काव्यात्मपदेन काव्यस्य मुख्यं तत्त्वमिति ज्ञायते। तदन्वेषणसरणावेव रसालङ्कार-ध्वनि-रीति-वक्रोक्ति-औचित्यवादानां जनिरभूत्।

## काव्यात्मान्वेषणम्

साहित्यशास्त्रे काव्यस्यात्मा कः ? इति जिज्ञासायाः समाधाने षट् सम्प्रदायाः प्रादुर्बभूवुः। काव्यं सहृदयहृदयहारि भवति, परन्तु काव्यस्य सौन्दर्ये किं तत्त्वं महत्त्वपूर्णमिति आपाततः प्रतिपादयितुं न शक्यते। अत एवालङ्कारिकैराचार्यैः काव्यात्मान्वेषणक्रमे बहुविधाः सम्प्रदायाः प्रतिपादिताः। तेषां सम्प्रदायानां क्रमशश्चर्चा प्रासङ्गिकीति अत्रोपस्थाप्यते। आचार्यैः प्रतिपादितेषु सम्प्रदायेषु रसालङ्कारध्वनिरीतिवक्रोक्ति-औचित्यसम्प्रदायाः प्रमुखाः सन्ति। एते च सम्प्रदायाः काव्यस्य प्रमुखतत्त्वान्वेषण एव पर्यवसिता दरीदृश्यन्ते।

### रससम्प्रदायः

साहित्यवाङ्मये सिद्धान्तरूपेण प्रतिष्ठितः प्रथमः सिद्धान्तो विद्यते रससिद्धान्तः। अस्य सिद्धान्तस्य प्रतिष्ठापको भरतमुनिः समग्रपूर्वीयसाहित्यवाङ्मयस्यैवाद्याचार्यो विद्यते। रसशब्दो वैदिकवाङ्मये बहुशः प्रयुक्त आसीत्। काव्यवाङ्मये रसशब्दस्य प्रथमप्रयोक्ता अपि भरतमुनिरेवाजायत। सर्वप्रथमं **रस**शब्दस्योल्लेखः सोमरसस्यार्थे — *दधानः कलशे रसम्* (शर्मा, १९९६, पृ. ५८३) आनन्दार्थेऽर्थे - *रसो वै सः, रसं ह्येवायं लब्ध्वानन्दीभवति* (गिरिः, २०७३, पृ. ३९५) कृतो वर्तते। यद्यपि वैदिकसाहित्ये रसादिशब्दानामुल्लेखोऽवश्यं वर्त्तते किन्तु साहित्यिकसम्प्रदायरूपेण रससिद्धान्तस्य प्रवर्तकः नाट्यशास्त्रकारः भरतमुनिरेव। राजशेखरेण (९१० ई०) तु सर्वप्रथमं रसस्योपदेशो ब्रह्मणा नन्दिकेश्वराय प्रदत्तः इति प्रतिपादितः, परन्तु तत्प्रतिपादितरससिद्धान्त इदानीं यावदुपलब्धो न वर्त्तते। भरतमुनेः पूर्वं वाल्मीकीयरामायणस्य विद्यमानत्वाद् बालकाण्डान्तर्गते *'रसैः शृङ्गारकरुणरौद्रवीरभयानकैः'* इत्यादिपद्ये अष्टानां रसानामुल्लेखः कृतोऽस्ति।

*'निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः।'* (कालिदास, २०५९, पृ. ४२५)

*काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।*

*क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥* (आनन्दवर्धन, सन् २००३, पृ. ८६)

*'अथ स ब्रह्मर्षिरेकदा माध्यन्दिनसवनाय नदीं तमसामनुपपन्नः। तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं ददर्श। आकस्मिकप्रत्यवभासां च दवीं वाचमव्यतमानुष्टुभेन छन्दसा परिणतामभ्युदैरयत्।'* (भवभूतिः, सन् १९९९, पृ. ८९)

इत्यनया रीत्या कालिदासस्य, ध्वनिकारस्य, भवभूतेश्च यथाक्रमं क्रौञ्चवधवर्णनस्योपलम्भाद् *'शोकः श्लोकत्वमागतः'* इति बालकाण्डीयश्लोकावगमाच्च आदिकाव्योदयः करुणरस एव सञ्जात इति नात्र मनागपि सन्देहलेशः।

वस्तुतस्तु रसपरम्परायाः प्राचीनतायां न कापि विप्रतिपत्तिः ।

स्वयं भरतेनैव नाट्यशास्त्रषष्ठाध्याये उक्तम्—

*'एते ह्यष्टौ रसाः प्रोक्ता द्रुहिणेन महात्मना । इति'* (भरतमुनि , सन् १९४३, पृ. ९१)

अत्र पूर्वाचार्याणां सङ्केतः कृतः । अतः रससिद्धान्तः सर्वप्राचीन इति सिद्धः । अथ कोऽयं रस इति जिज्ञासायां 'काव्यपठनेनाथवा श्रवणेनाथ चाभिनयदर्शनेन यादृश आनन्दो भवति स एव 'रस' इति सर्वजनीनानुभवः। रसनिष्पत्तिविषये च भरतस्य —*'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः'* (भरतमुनि, सन् १९५६, पृ. २७२) इति। सूत्रमिदमल्पाकारमपि अनेकव्याख्याकर्तृणां तर्कमूलिकां हृदयङ्गमां युक्तियुक्तां व्याख्यामवलोक्यातिमहत्त्वाधायकमित्यामनन्ति सर्वे। तासु व्याख्यासु एतेषां चतुर्णां व्याख्या ख्यातिंगता। तत्र भट्टलोल्लटस्योत्पत्तिवादः, श्रीशङ्कुकस्यानुमितिवादः, भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्याभिव्यक्तिवादश्च। कैश्चिदाचार्यैरेतदतिरिक्ता अन्येऽपि रससूत्रव्याख्यासम्बद्धा वादाः प्रतिपादिताः परमेत एव चत्वारो वादाः सर्वविद्वज्जनपूज्या विद्यन्ते।

**अलङ्कारसम्प्रदायः**

अलङ्क्रियतेऽनेनेति करणव्युत्पत्त्या अलङ्कारशब्दः निष्पद्यते। काव्यस्य सौन्दर्याधायकत्वरूपेण शब्दोऽयं साहित्ये प्रयुज्यते। अस्या व्युत्पत्त्या आधारेणैव तदितरसिद्धान्तेषु काव्यात्मनो भूषणस्थानीयतया अलङ्कारः स्वीक्रियते। अलङ्कारवादः शब्दार्थगतं चमत्कारमेव कवित्वशक्तेराधाररूपेण स्वीकरोति न तु तेनाभिव्यक्तं भावतत्त्वम्। सामान्यरूपेण अलङ्कारस्य चर्चा प्राचीनपरम्परया लभ्यते। वेदेषु काव्यशास्त्रीयतत्त्वस्य प्रयोगो यद्यन्विष्यते तर्हि सर्वाधिकरूपेण अलङ्काराणां प्रयोगाः प्राप्यन्ते । निरूक्त उपमालङ्कारस्य शास्त्रीयं निरूपणं प्राप्यते। पाणिनीयव्याकरणे स्पष्टरूपेण उपमा-रूपकालङ्कारयोर्भेदेन समासस्य प्रत्ययादेश्च व्यवस्था कृतेति *''उपमितं व्याघ्रादिभिः सामान्याप्रयोगे'* (दीक्षितः, सन्१९७७ पृ. ७३६) इत्याद्यनुशासनेन ज्ञायते। नाट्यशास्त्रे उपमा-रूपक-दीपक-यमकानां निरूपणं प्राप्यते- *''उपमा रूपकं चेव दीपकं यमकं तथा । अलङ्कारास्तु विज्ञेयाः''* (भरतमुनिः, २०२८ पृ. ५०)। इत्थं सामान्यत: प्राचीनकालात् प्रचलिताप्यलङ्कारचर्चा सम्प्रदायगतरूपेण भामहस्य काव्यालङ्कारे व्यवस्थितिं महत्त्वञ्च जगाम भामह उक्तिवैचित्र्यरूपां वक्रोक्तिं काव्यस्य मूलं तत्त्वं मन्वानस्तामलङ्काररूपेण निरूपयति- "सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते। यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना।'' (भामह,२०४२ पृ.४०) भामहस्य मते सकलालङ्कारस्य प्रयोजकं वक्रोक्तितत्त्वं काव्यस्यान्तरमुक्तिवैचित्र्यरूपं सौन्दर्यं वर्तते, न खलु परवर्तिभिर्विश्वनाथप्रभृतिभिः प्रतिपादिता प्रहेलिकाकल्पा वक्रोक्तिः । तथापि सा त्वलङ्कृतिरूपा एव एवं भामहस्य मतेऽलङ्कारः सौन्दर्यरूपार्थे नियोज्यते अलङ्करणम् अलङ्कारः। अत एवाचार्योऽयं रसमपि

'रसवदलङ्कार' नाम्ना व्यपदिशति- "*रसवद्दर्शितस्पष्टशृङ्गारादिरसं यथा। देवी समागमद्धर्ममस्करिण्यतिरोहिता*" (भामहः २०४२, पृ.५५)। भामहोऽलङ्कारमुक्तिवैचित्र्यरूपेण परिभाषयन्नपि तस्य बहिरङ्गभेदानपि स्वीकृत्य विवेचयति। काव्येऽलङ्कारस्य प्राधान्यं दर्शयित्वा तस्य भेदरूपेण रसं व्यवस्थापयति । एवं सत्यप्यसौ काव्यस्य महत्तमे रूपे महाकाव्ये रसयोजनाया अनिवार्यतां दर्शयति- "युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्" इति। अलङ्कारवादी सन्नपि स काव्ये रसस्य महत्त्वमुच्चैर्मन्यते- "*स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुञ्जते। प्रथमालीढमधवः पिबन्ति कटुभेषजम्*"(भामहः, २०४२, पृ.२०)। "*काव्यशोभाकारान् धर्मानलङ्कारान् प्रचक्षते*" (दण्डी, २०२८, पृ. ३५) इति दिशा काव्यशोभाकराणां सर्वेषां विषयाणां तथा- "*यच्च तु सन्ध्यङ्गवृत्त्यङ्गलक्षणाद्यागमान्तरे। व्यावर्णितमिदं चेष्टमलङ्कारतयैव नः*" (दण्डी, २०२८, पृ. ५०) इति। उद्भटः रसवदलङ्काररूपेण रसान् निरूप्यातिरिक्तं शान्तरसं स्थापयति। यद्यपि अभिनवगुप्तपादाचार्यः भरतमुनिं शान्तरसस्य स्थापकं मन्यते "*मुनिनाप्यङ्गीक्रियत एव 'क्वचिच्छम' इत्यादि वदता'* (अभिनव, सन् १९९२, पृ. ३३२) तथापि साम्प्रतिकाः काव्यशास्त्रिणः उद्भटमेव शान्तरसस्य प्रवर्तकं मन्यन्ते (नगेन्द्रः, सन् १९८०, पृ. २३८)।

अलङ्कारसम्प्रदायान्तर्गतस्यापि रुद्रटस्य सविस्तृतं स्वतन्त्रञ्च रसनिरूपणं तथा प्रेयोऽलङ्कारस्य स्थापनञ्च वीक्ष्य कतिचन तस्यालङ्कारसम्प्रदायकत्वे आपाततः सन्दिह्यन्ते । जयदेवो यद्यपि ध्वनिवाद्यस्ति तथापि तस्य- "*अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती। असौ न मन्यते कस्मादनुष्णमनलङ्कृती*।' (जयदेवः, सन् १९८८, पृ. १५) इति दिशा अलङ्काररहितयोरपि शब्दार्थयोः काव्यत्वं स्वीकर्तरि मम्मटे आक्रोशं प्रकाशयति। जयदेवः काव्ये रसस्य महत्त्वमुच्चैर्गायन् तत्स्वरूपं मलयजलेऽप्याह्लादस्य बिम्बप्रयोगेण निरूपयति। एवम् अलङ्कारसम्प्रदाये रसः पूर्वं गौणरूपेण स्वीकृतोऽपि क्रमशो महिममयरूपेण समादृतः ध्वनिसिद्धान्तस्य स्थापनानन्तरम् अलङ्कारतत्त्वं काव्यात्मरूपेण प्रतिष्ठापितस्य ध्वनेः शोभावर्धकरूपेण स्थिरीकृतः। साम्प्रतिकाः काव्यशास्त्रिणो विश्वनाथस्य 'अलङ्काराः कटककुण्डलादिवत्' इत्युक्त्यनुसारेण निर्धारितं तेषां तादृशं भूषणस्थानीयं रूपं न स्वीकुर्वन्ति। ते "*अलङ्कारा न केवलं रसस्योपकारकाः प्रत्युतस्ते रसाभिव्यक्तौ माध्यमाः सन्ति*" इति निरूपयन्ति। अलङ्कारसिद्धान्तोऽयं साहित्यशास्त्रस्य महत्त्वपूर्णः सर्वैरङ्गीकृतश्च सिद्धान्तोऽस्ति। काव्यानां शोभावर्धकत्वेनायं गृहीतोऽस्ति।

**रीतिसम्प्रदायः**

रीतिसम्प्रदायस्य प्रतिपादकः प्रधानाचार्यो विद्यते वामनः। एतन्मतानुसारं रीतिरेव काव्यस्यात्मास्ति। 'रीङ् स्रवणे' इति दैवादिकाद्धातोः क्तिन्प्रत्ययविधानेन रीतिशब्दो निष्पद्यते। भोजस्तु गत्यर्थकाद् रीङ्धातोः क्तिन्प्रत्ययेन

पदमिदं साधयति- "वैदर्भादिकृतः पन्था काव्ये मार्ग इति स्मृतः। रीङ्गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते" (भोजराजः, सन् १९४३, पृ. ७०) इति। एवं निष्पादितस्य रीतिपदस्य स्रवणं गमनमार्गो वेत्यर्थो भवति। अतो दण्डिप्रभृतयः कतिपये आचार्या एतदर्थं मार्गपदं प्रयुञ्जते। रीतेर्मूले गुणाः, समासः, अनुप्रासः, वर्णव्यापारः, पदसङ्घटना च कारकत्वेन तिष्ठन्ति। आनन्दवर्धनोऽस्या नियामकेषु वक्त्रौचित्यं वाच्यौचित्यं विषयौचित्यं रसौचित्यञ्चेति चत्वार्यौचित्यानि निर्धारयति- "तन्नियमे हेतुरौचित्यं वक्तृवाच्ययोः विषयाश्रयमप्यन्यदौचित्यं तां नियच्छति काव्यप्रभेदाश्रयतः" (आनन्दवर्धनः, सन् १९९२, १६०)। उद्भटः रीतितत्त्वं वृत्तिपदेनाभिधाय तां वृत्यनुप्रासेऽन्तर्भावयति "सरूपव्यञ्जनन्यासं तिसृष्वेतासु वृत्तिषु पृथक् पृथगनुप्रासमुशन्ति कवयः सदा।" इति। उद्भटः परुषा, उपनागरिका कोमलेति त्रिषु भागेषु वृत्तिं विभाजयति। वामनः पूर्ववर्तिभिर्विभिन्नैर्नामभिरुपात्तं तद् वस्तु रीतिपदेनाभिधाय तस्य स्वरूपं स्फुटरूपेण निरूपयति "विशिष्टा पदरचना रीतिः" (वामनः, २०२८, पृ. २०) इति। स रीतेर्वैशिष्ट्येन गुणान् योजयति- "विशेषो गुणात्मा"। स रीतिं काव्यस्यात्मस्थानीयं मन्यते "रीतिरात्मा काव्यस्य" इति। एवं वामनाचार्यस्य मतानुसारेण गुणवैशिष्ट्यशालिनी रीतिः काव्यास्यात्मस्थानीया वर्तते। रीतिं वदैर्भी गौडीया पाञ्चाली चेति त्रिषु भेदेषु विभाजयति। रुद्रटः वामनेन विभक्ताया रीतेः पाञ्चाली, लाटीया, गौडीया, वैदर्भीति चतुरो विभागान् प्रकल्प्य तदवच्छेदकतया समासं निर्धार्य नियतरसेषु नियतां रीतिं व्यवस्थापयति *"वैदर्भी पाञ्चाल्यौ प्रेयसि करुणे भयानकाद्भुतयोः। लाटीयागौडीये रौद्रे कुर्याद्यथौचित्यम्।।* (रुद्रटः, १९८९, पृ.४०) इति। एवं रुद्रट इदं प्रथमतया रसरीत्योः योजयति। आनन्दवर्धनो सङ्घटनापदेन वृत्तिपदेन चाभिधाय असमासा, मध्यसमासा दीर्घसमासा चेति भागेषु विभाजयति। स सङ्घटनां गुणाश्रितां मत्वा तस्या रसव्यञ्जकत्वं प्रतिपादयति- *"गुणानाश्रित्य तिष्ठन्ती माधुर्यादीन् व्यनक्ति सा"* इति। आनन्दवर्धनस्योक्तौ गुणरीत्योः व्यङ्ग्यव्यञ्जकभावो दृश्यते। गुणानां रसधर्मतया परम्परयेदं रसमपि व्यञ्जयति। परवर्तिनो ध्वनिवादिनोऽपि गुणरीत्योः सम्बन्धं ध्वनिकारनिर्दिष्टपथा स्वीकृत्य रीतिं शरीरावयवसंस्थानसादृश्येन काव्यस्य बाह्यं तत्त्वं मन्यन्ते। कुन्तकः रीतीनां देशाभिधानेन नामकरणेऽरुचिं प्रदर्श्य तां मार्गपदेनाभिधाय तस्य सुकुमारः, मध्यमः, विचित्रश्चेति त्रीन् भेदान् निर्दिशति। मम्मट उद्भटानुसारेण वृत्तिनाम्नाऽभिधाय तामनुप्रासालङ्कारान्तर्गततया चर्चयति। एवं पूर्ववर्तिभिः परवर्तिभिश्च बहिरङ्गतया निरूपितां रीतिं वामनः काव्यात्मरूपेण निरूपयति- रीतिरात्मा काव्यस्य इति।

**ध्वनिसम्प्रदायः**

ध्वनिसम्प्रदायस्य प्रवर्तक आचार्य आनन्दवर्धनो विद्यते। आचार्योऽयं काव्यात्मरूपेण ध्वनितत्त्वं स्वीकरोति। यद्यपि ध्वनितत्त्वस्य विश्लेषणं ध्वनेर्महत्त्वञ्च प्राचीनैर्भामहादिभिराचार्यैरपि प्रकटितमासीत्तथापि ध्वनेः काव्यात्मत्वं

व्यङ्ग्यमूलकत्वञ्च राजानकानन्दवर्धनेनैव प्रतिपादितम्। विषयेऽस्मिन् पण्डितराजोऽपि साभिनिवेशं प्रतिपादयति यत्- "*ध्वनिकारात् प्राचीनैर्भामहोद्भटप्रभृतिभिः स्वग्रन्थेषु कुत्रापि ध्वनिगुणभूतव्यङ्ग्यादिशब्दा न प्रयुक्ता इत्येतावतैव तैर्ध्वन्यादयो न स्वीक्रियन्त इत्याधुनिकानां वाचोयुक्तिरयुक्तैव। समासोक्तिव्याजस्तुत्यप्रस्तुतप्रशंसाद्यलङ्कारनिरूपणेन कियन्तोऽपि गुणभूतव्यङ्ग्यभेदाः तैरपि निरूपिताः। अपरश्च सर्वोऽपि व्यङ्ग्यप्रपञ्चः पर्यायोक्तकुक्षौ निक्षिप्तः* " (जगन्नाथः, २०३७, ५३२ ) | आनन्दवर्धनः पूर्ववर्तिनामलङ्काररसरीतिसिद्धान्तानां सम्यङ् मूल्याङ्कनं विधाय काव्यात्मरूपेण स्थिरीकृतस्य ध्वनेरप्यात्मतत्त्वरूपेण रसस्याङ्गीकरणम्, अलङ्काराणां शब्दार्थधर्मत्वेन काव्यस्य बहिरङ्गशोभावर्धकत्वं निरूप्य कटककुण्डलादिसाम्येन स्थाननिर्धारणं रीतेः शरीरावयवसंस्थानसाम्याद् ध्वन्यात्मत्वेन स्थापितस्य रसस्योत्कर्षजनकतया मूल्याङ्कनञ्च कृतवान्। पूर्ववर्तिभ्यामलङ्काररीतिसम्प्रदायाभ्यां गुणीकृतस्य रससिद्धान्तस्य स्तरोन्नयनं ध्वनिसिद्धान्तस्योद्देश्यं वर्तते। एतदुद्देश्ये आनन्दवर्धनः पूर्णतः सफलो जातः। ध्वनिसिद्धान्तस्य प्रतिपादनात् पूर्व रसो वाच्यविषयत्वेन ज्ञायमानत्वात् सङ्कुचिते परिधौ विद्यमान आसीत्। व्यञ्जनीयतया व्याख्यानात्तस्य स्तरोन्नयनं सार्वभौमं महत्त्वञ्च जातम्। ध्वनिकारः सुस्पष्टरूपेणालङ्कारादीनां विन्यासोद्देश्यं परित्यज्य रसाभिव्यञ्जनेऽवधानार्थं कवीन् निर्दिशति- "*मुख्या व्यापारविषयाः सुकवीनां रसादयः। नीरसस्तु प्रबन्धो यः सोऽपराधो महान् कवेः*।" (आनन्दवर्धनः, सन् १९९२, पृ. ४०१)। ध्वनिसम्प्रदायानुसारेण काव्यस्यात्मा ध्वनिरस्ति चेद् ध्वनेरात्मा रसो वर्तते। ध्वनिसिद्धान्तोऽयं व्याकरणस्य स्फोटसिद्धान्तात्प्रभावितो दृश्यते। सः स्फोटः शब्दजः शब्दः ध्वनिरित्युच्यते बुधैः। इति भर्तृहरेः उक्तिस्तदेव तथ्यं प्रमाणयति। पूर्वं ध्वनितत्त्वस्य समर्थका न्यूना आसन्। परन्तूत्तरोत्तरं समर्थका आचार्या वृद्धिङ्गताः। स्वल्पात्काव्यात् महाप्रबन्धपर्यन्तं ध्वनेर्विद्यमानत्वात् काव्यस्यात्मा ध्वनिरिति सर्वैरङ्गीक्रियते।

**वक्रोक्तिसम्प्रदायः**

वक्रोक्तिसम्प्रदाय आचार्यकुन्तकात्प्रादुर्भूतोऽस्ति। वक्रोक्तिविषये आचार्यभामहेन यद्यपि किमपि बीजवपनं विहितं तथापि तस्य प्रतिपादनं परिपोषणञ्च कुन्तकेनैव विहितम्। वक्रोक्तिशब्दः काव्यजन्यचमत्कारसामान्यवाचकत्वेन, काव्यसिद्धान्तविशेषवाचकत्वेन अलङ्कारविशेषवाचकत्वेन चेति त्रिधा प्रयुज्यते। प्रथमार्थबोधकतया भामहः सर्वेषामलङ्काराणां मूले वक्रोक्तिं निर्धारयति। काव्येतरवाङ्मयाद् व्यावर्तकत्वेन वक्रोक्तिं कुन्तकः प्रयुङ्क्ते चेच्छब्दालङ्कारेष्वन्यतमवाचकत्वेन मम्मटप्रभृतयः प्रयुञ्जते। वक्रोक्तिसिद्धान्तस्य प्रतिपादकग्रन्थस्य वकोक्तिजीवितस्य प्रणयने कुन्तकस्य प्रयोजनं वक्रोक्तिमाध्यमेन लोकोत्तरचमत्कारिवैचित्र्यसाधनं विद्यते। अङ्गीकृतोद्देश्ये सिद्धान्तोऽसौ सर्वांशतः सफलो दृश्यते। सिद्धान्तोऽयं पूर्ववर्तिनो

रसालङ्काररीतिध्वनिसिद्धान्तान् स्वस्मिन्नन्तर्भावयति। कुन्तको रीतेर्गुणस्य च समुचितं मूल्याङ्कनं विधाय नवीनतया परिभाषते। अलङ्कारालङ्कार्ययोः सूक्ष्मनिरीक्षणेन तयोः स्थाननिर्धारणेऽसौ ध्वन्यालोककारमप्यतिशेते। तस्य तत्सामर्थ्यं रसवदलङ्कारनिरूपणे स्फुटतां याति। कुन्तकेन रसरसवदलङ्कारयोः पार्थक्यविभाजनेऽवलम्बिता सरणिर्नितरां वैज्ञानिकी रसस्य सर्वोच्च प्रतिष्ठादायिनी चास्ति। कुन्तककृता साहित्यपरिभाषा तस्य सूक्ष्मविश्लेषणशक्तिं सूचयति। प्रायो भामहादर्वाचीनाः सर्वेऽप्यालङ्कारिका वक्रोक्तिं समाद्रियन्ते। पूर्वं वक्रोक्तिरलङ्काररूपेणैव प्रसिद्धा आसीत्। परन्तु कालान्तरे साहित्यिकसम्प्रदायरूपेण परिचिता बभूव। वक्रोक्तिशब्दस्य व्युत्पत्तिश्च वक्रा= सर्वसाधारणजनकथनभिन्नालौकिकचमत्कारयुक्ता, उक्तिः= कथनम् इत्यनया रीत्या निष्पन्ना। कुन्तकमतानुसारन्तु वैदग्ध्यभङ्गीभणितिरेव वक्रोक्तिः। उक्तञ्च- *वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते* (कुन्तकः, २०२४, पृ. १०) इति। इयं वक्रोक्तिरलङ्कारविशेषरूपेण पूर्वं परिचितापि कुन्तकं प्राप्य प्रसिद्धसम्प्रदायरूपेण विकसिता काव्यस्यात्मरूपेण मुख्यतत्त्वरूपेण वा विद्यमाना एषा कविभिर्नोपेक्षणीया। वक्रोक्तिहीनं काव्यं मृततुल्यं भवतीति वक्रोक्तेः काव्यात्मत्वमङ्गीकुर्वतां कुन्तकाद्याचार्याणामाशयः।

**औचित्यसम्प्रदायः**

औचित्यसम्प्रदायः सर्वेषु सम्प्रदायेषु कनिष्ठः सम्प्रदायो विद्यते। अस्य सम्प्रदायस्य प्रवर्तकाचार्य आचार्यक्षेमेन्द्रोऽस्ति। तन्मतानुसारमौचित्यमेव काव्यस्यात्मा इति। औचित्यं रससिद्धस्य काव्यस्य जीवितम् (क्षेमेन्द्रः, २०२१, पृ. ५) इति समुद्घोष्यौचित्यस्यैव काव्यस्यात्मत्वं स्वीकरोति। क्षेमेन्द्रेण पूर्वाचार्याणां रसालङ्कारवादिनां विचारं गृहीत्वैवौचित्यस्य प्रवर्तनं तस्य काव्यात्मरूपेण घोषणञ्च विहितमस्ति। नाट्यशास्त्रे स्थले स्थले औचित्यस्य महत्त्वमुपयोगित्त्वञ्च यद्यपि प्रतिपादितं तथापि शब्दत औचित्यशब्दो नैव प्रयुक्तः। भरतकर्तृकौचित्यनिरूपणस्य सारांसोऽभिनवगुप्तपादस्य शब्देष्वेवं स्फुटतां याति "मुनिनापि हि स्थानेस्थाने प्रकतौचित्यमेव विभावानुभावादिषु बहुतरं प्रमाणीकृतं *'स्थैर्येणोत्तममध्यमाधमानां नीचानां सम्भ्रमेण'* इत्यादि वदता" (अभिनवः, १९९२, पृ. ३६५) इति। भामहस्य काव्यालङ्कारेऽप्यौचित्यशब्दमनुल्लिख्य तस्य निर्वाहाय निर्देश: प्राप्यते। तत्र दोषाणां त्याज्यत्वं विविच्य पर्यन्ते औचित्ये सति दोषस्यापि मालान्तर्गतनीलपलाशस्य कामिन्या नयनयोर्लिप्तस्य कज्जलस्य च बिम्बप्रयोगेणादूषकत्वं स्वीकृतम्। दण्डिनः काव्यदर्शेऽप्येतद्विषये प्रभूताः सङ्केताः प्राप्यन्ते। काव्यशास्त्रेतिहासे उद्भट इदंप्राथम्येनौचित्यस्य व्यतिरेकि 'अनौचित्य'पदं प्रयुङ्क्ते- *'अनौचित्यप्रवृत्तानां कामक्रोधादिकारणात्। भावानां च रसानां च बन्ध ऊर्जस्वि कथ्यते*"। रुद्रटेन सूत्ररूपेण निबद्धमौचित्यमानन्दवर्धनो वैशद्येन निरूप्यालङ्कारगुणसङ्घटनारसादीनां सन्दर्भेण योजयति। तस्य 'अवसरे गृहीतिः' रुद्रटस्य गृहीतमुक्तत्वमेव वर्तत इत्यनुमाने काठिन्यं नानुभूयते।

आनन्दवर्धनकृतौचित्यनिरूपणस्य निष्कर्षो वृत्तिग्रन्थगतकारिकायां सङ्गृहीतः-*'अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्। प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा*" (आनन्दवर्धनः, १९९२, पृ. ३६२)। औचित्यनिरूपणे क्षेमेन्द्र आनन्दवर्धनात् पूर्णतः प्रभावितो वर्तते। वस्तुतो ध्वन्यालोकात् स्फूर्त्तिमादायैव स औचित्यं पल्लवयामासेति विदुषामुक्तिस्तथ्यपूर्णा प्रतीयते। वक्रोक्तिसिद्धान्तेऽप्यौचित्यस्य पालनाय स्थले स्थले आग्रहो दृश्यते। तत्र पदौचित्यवृत्त्यौचित्यसमयौचित्यस्वभावौचित्यवाच्यौचित्यप्रभृतीनां निर्वाहाय निर्देशः प्राप्यते। कुन्तकः काव्यप्रयोजनप्रस्तावे तदध्येतृफलकतयौचित्यज्ञानं सन्निवेशयति- "सत्काव्याधिगमादेव नूतनौचित्यमाप्यते' इति। एवं पूर्वाचार्यैः साग्रहं निरूपितमौचित्यं क्षेमेन्द्रः काव्यस्य जीवनरूपेण घोषितवान्। यद्यपि काव्यस्य जीवनरूपेण परिभाष्य तस्य महत्त्वं क्षेमेन्द्रेण प्रतिपादितं तथापि तस्य स्वरूपं स्पष्टं न भवति। न च तस्य "*कण्ठे मेखलयानितम्बफलके तारेण हारेण वा* इत्यादिपद्येन तस्य स्वरूपं स्फुटतां याति, एतद्धि बिम्बप्रयोगमात्रम्। न हि बिम्बज्ञानमात्रेण बिम्बिनश्चित्रं स्फुरति बिम्बिनोऽपेक्षायाम्। साहित्यसम्बद्धसम्प्रदायेष्ववर्वाचीनोऽप्ययं सम्प्रदायो बहुभिराचार्यैः स्वीकृतोऽस्ति। एतत्सम्प्रदायानुसारमौचित्यमेव काव्यस्यात्मा। औचित्यहीनं काव्यं वस्तुतः काव्यं न कथ्यते। तस्मात् काव्यस्यात्मरूपमौचित्यं सर्वैः कविभिः सहृदयैश्च निर्वहनीयमिति सम्प्रदायस्यास्य हार्दम्।

## निष्कर्षः

शरीरस्य अतिमहत्त्वपूर्णतत्त्वरूपेणात्मतत्त्वं ज्ञायते। आत्मनोऽभावे सर्वाणीन्द्रियाणि सर्वे प्राणाश्च निष्प्राणा जायन्ते। शरीरे यथात्मनोऽन्वेषणं महत्त्वपूर्णं कार्यं तथैव साहित्येऽपि काव्यात्मान्वेषणं न न्यूनम्। साहित्यशास्त्रं हि लोकव्यवहारेऽतीवोपयोगि शास्त्रं मन्यते। शास्त्रेऽस्मिन् सरलतया सरसतया च बहवो विषयाः प्रतिपादिता भवन्ति। विशेषतः काव्यसम्बद्धा विषया विवेचिताः प्राप्यन्ते। देशाकालानुसारमलङ्कारशास्त्रम्, सौन्दर्यशास्त्रम्, व्यवहारशास्त्रमित्यादीनि नामानि साहित्यशास्त्रस्यैवाभिधेयान्तराणीति विज्ञानां विचारः। अतः लोकमर्यादायाः, जीवनपद्धतेः, अनुशासनादीनां च शिक्षानितरसाधारणसरण्या सर्वेभ्यः प्रयच्छतीति शास्त्रमिदं मानवानां महदुपकारकम्। तस्मादुक्तं शास्त्रकारैः – साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः। इति। साहित्यशास्त्रं काव्यशास्त्रनाम्नापि प्रसिद्धमस्ति। अत्र काव्यसम्बन्धिनी विभिन्ना धारणा प्रस्तुता विद्यन्ते। काव्यस्यात्मान्वेषणे एव शास्त्रस्यास्य पर्यवसानं दृश्यते। मूलतः काव्यस्यात्मा कः ? इत्यनुयोगस्योत्तरमन्वेष्टुं प्रवृत्तमिदं शास्त्रं बह्वाचार्यविचारसरणिमाश्रित्य बहुधापन्नं दृश्यते। अत्र षट् सम्प्रदायाः प्रचलिताः सन्ति। भरतमुनिमारभ्येदानीं यावत् कालक्रमेण प्रचलिताः प्रसिद्धाश्चेमे षट् सम्प्रदाया देहिन इन्द्रियाणीव काव्यशास्त्रस्य महन्महत्त्वं दधते। ते च सम्प्रदायाः— भरतमुनेः रससम्प्रदायः, भामहोद्भटरुद्रटानामलङ्कारसम्प्रदायः, दण्डिवामनयोः रीतिसम्प्रदायः, कुन्तकस्य वक्रोक्तिसम्प्रदायः, आनन्दवर्धनाभिनवगुप्तयोर्ध्वनिसम्प्रदायः, क्षेमेन्द्रस्यौचित्यसम्प्रदायश्चेति षट् सन्ति।

एते सर्वेऽपि सम्प्रदायाः काव्यात्मान्वेषण एव प्रवृत्ताः सन्ति। दर्शनशास्त्रानुसारं काव्यात्मान्वेषणपूर्वकमात्मतत्त्वसाक्षात्कारे जाते यथा सर्वाणि सांसारिकाणि दुःखानि समाप्तिं यान्ति तथैव काव्यात्मान्वेषणानन्तरमपि सत्काव्यसेवनात् परनिर्वृतिरूपस्यानन्दस्य प्राप्तिर्जायत इति।

**कृतज्ञताज्ञापनम्**

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्यः सर्वेभ्यो विशेषज्ञगुरुभ्यः, अन्येभ्यः सहयोगिभ्यश्च हार्दं कातर्ज्यं व्यनज्मि।

**सन्दर्भग्रन्थसूची**

आनन्दवर्धनः. (सन् २०१०). *ध्वन्यालोकः*. वाराणसीः चौखम्बा विद्याभवन।
कठोपनिषद्. (२०३६). गोरखपुरः गीताप्रेस।
कालिदासः. (२०५९). *रघुवंशमहाकाव्यम्*. वाराणसीः चौखम्बा संस्कृत विद्याभवन।
गिरिः केशवानन्दः. (२०७६). *शुक्लयजुर्वेदसंहिता*. देवघाटः गुरुकुल प्रकाशन।
गिरिः, रामानन्दः. (२०७३). *ईशादि दश उपनिषद्*. देवघाटः महेश सन्यास आश्रम।
चौधरी, सत्यदेवः. (सन् १९६२). *काव्यशास्त्रीय निबन्ध*. दिल्लीः वासुदेव प्रकाशन।
छान्दोग्योपनिषद्. (२०३७). वाराणसीः महेश अनुसन्धान संस्थान।
धितालः, विश्वनाथः. (२०७८). *तर्कसंग्रहः*. देवघाटः महेश अनुसन्धान केन्द्र।
भरतमुनि. (सन् १९५६). *नाट्यशास्त्रम्* (संस्क. १). (रामकृष्णकवि, सं.) बारोडा: ओरिन्टल इन्स्टिच्युट.
भरतमुनिः. (सन् १९४३). *नाट्यशास्त्रम्(केदारनाथः)*. मुम्बईः निर्णय सागर प्रेस।
भवभूतिः. (सन् १९९९). *उत्तररामचरितम्*. वाराणसीः मोतीलाल बनारसीदास।
महर्षिगौतमः. (सन् १९६०). *न्यायसूत्रम्*. वाराणसीः चौखम्बा संस्कृत सीरिज।
विद्यारण्यः. (२०५२). *पञ्चदशी*. वाराणसीः चौखम्बा विद्याभवन।
वेदव्यासः. (२०७५). *भगवद्गीता*. गोरखपुरः गीताप्रेस।
शङ्कराचार्यः. (२०३५). *ब्रह्मसूत्रशाङ्करभाष्यम्*.वाराणसीः गोविन्द मठ टेढीनिम।
शुक्लयजुर्वेदः. (२०७६). (स्वामी, केशवानन्द सं.). देवघाटः गुरुकुल प्रकाशन।